# त्रैमासिक परीक्षा 2025-26

**विषय :- संस्कृत**

**कक्षा :- 9वी** **पूर्णांक - 75**

---

निर्देश : (1) सर्वे प्रश्नाः अनिवार्याः सन्ति ।

(2) प्रश्नानां सम्मुखे अङ्का प्रदत्ताः ।

(3) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि ।

प्र.1 उचितं विकल्पं चित्वा लिखत - 1x6=6

(1) 'वाणी' पदे वचनम् अस्ति -

(अ) एकवचनम् (ब) द्विवचनम्, (स) बहुवचनम् (द) एतेषु कोऽपिन

(2) 'तटे' पदे विभक्तिः अस्ति-

(अ) द्वितीया (ब) सप्तमी (स) तृतीया (द) षष्ठी

(3) 'बालकस्य' पदे विभक्तिः अस्ति-

(अ) चतुर्थी (ब) पञ्चमी (स) षष्ठी (द) तृतीया

(4) 'बालिका' इति पदम् अस्ति-

(अ) अकारान्तः (ब) आकारान्तः (स) उकारान्तः (द) ईकारान्तः

(5) 'सदाचारः एव परमोधर्मः' अस्मिन् वाक्ये अव्ययम् अस्ति-

(अ) सदाचारः (ब) परमः (स) धर्मः (द) एव

(6) अधोलिखितेषु अव्ययं पदम् अस्ति-

(अ) सर्वत्र (ब) रमा (स) बालः (द) पुस्तकम्

प्र.2 प्रदतैः शब्दैः रिक्तस्थानानि पूरयत् - 1x6=6

(1) 'हस' धातोः लोट् लकारस्य प्रथम पुरूषस एकवचने............रूपं भवति । (हसतु/हसन्तु)

(2) 'खादन्ति' पदे...............वचनम् अस्ति । (एकवचनम्/बहुवचनम्)

(3) 'भू' धातोः लृट् लकारस्य उत्तम पुरुषस्य द्विवचने ............रूपं भवति । (भविष्याव:/भविष्यामः)

(4) 'अलिखन्' पदे................लकारः अस्ति । (लट्/लङ्)

(5) 'अनुभवति' पदे..................उपसर्गः अस्ति। (अनु/भवति)

(6) 'पराजय' पदे......................उपसर्गः अस्ति । (परा/जयः)

प्र.3 युग्म मेलनं कुरूत- 1x6=6

| 'अ' | 'ब' |
|---|---|
| (1) नि+अवसत् | गुण सन्धिः |
| (2) सूर्योदयः | न+इच्छामि |
| (3) नेच्छामि | न्यवसत् |
| (4) यथाशक्तिः | माता च पिता च |
| (5) घन इव श्यामः | अव्ययीभाव समासः |
| (6) पितरौ | घनश्यामः |

प्र.4 एकपदेन उत्तरं लिखत- 1x6=6

(1) 'दृष्ट्वा' इत्यत्र कः प्रत्ययः ? दृष्ट्वा इत्यत्र क्त्वा प्रत्यय

(2) 'आगम्य' इत्यत्र कः प्रत्यय ?

(3) पट्+तुमुन् प्रत्यय योजनेन किं रूपं भवति ?

(4) कविः कां सम्बोधयति ?

(5) स्वर्णकाकः कान् अखादत् ?

(6) तुला कीदृशी आसीत् ?

प्र.5 शुद्धवाक्यानां समक्षम् 'आम' अशुद्धवाक्यानां समक्षम् 'न' इति लिखत- 1x6=6

(1) 'खिन्नःबालः' इत्यत्र विशेषण पदं 'खिन्नः' अस्ति। आम

(2) 'आस्वाद्यतोयाः नद्यः' इत्यत्र विशेष्यं पदं 'नद्यः' अस्ति। आम

(3) 'आम्रम्' इत्यस्य पर्याय पदं 'रसालः' अस्ति। आम

(4) 'पवनः' इत्यस्य पर्याय पदं 'रसालः' अस्ति। न

(5) 'नीरसः' शब्दस्य विलोमं पदं 'सरसः' अस्ति। आम

(6) 'प्राचीनम्' शब्दस्य विलोमं पदं 'पुरातनम्' अस्ति। न

(प्रश्न क्रमांक 6 तः 10 पर्यन्त प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत-)

प्र.6 सलिलं तव वीणामाकर्ण्य: कथं उच्चलेत् ? (अथवा) 2

निर्धनायाः वृद्धायाः दुहिता कीदृशी आसीत् ?

प्र.7 यत्नेन किं रक्षेत् वित्तं वृत्तं वा ? (अथवा) 2

जन्तवः केन तुष्यन्ति ?

प्र.8 वसन्ते किं भवति ? (अथवा) 2

सरोवराणां हानिः कदा भवति ?

प्र.9 बालः कदा क्रीडितुम् अगच्छत् ? (अथवा) 2

बालकः कीदृशं चटकम् अपश्यत् ?

प्र.10 कालः कस्य रसं पिबति ? (अथवा) 2

रूनानानन्तरं पुत्रविषये पृष्टः वणिक्पुत्रः श्रेष्ठिनं किम् अवदत् ?

प्र.11 रेखाङ्कित पदमाधृत्य प्रश्ननिर्माणं कुरूत- (कोऽपि द्वे) 2

(क) ग्रामे <u>निर्धना स्त्री</u> अवसत्।

(ख) कुक्कुटः <u>मानुषाणां</u> मित्रम् अस्ति।

(ग) <u>जीर्णधनः</u> विभवक्षयात् देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्।

प्र.12 अधोलिखितानि वाक्यानि कः कं प्रति कथयति। (कोऽपि द्वे) 2

| | कः/का | कं/काम् |
|---|---|---|
| (क) पूर्वं प्रातराशः क्रियताम्। | ............... | ............... |
| (ख) सूर्यातपे तण्डुलान् खगेभ्यो: रक्ष। | ............... | ............... |
| (ग) तण्डुलान् माा भक्षय। | ............... | ............... |

प्र.13 वाच्यपरिवर्तनं कुरूत – (कोऽपि द्वे) 2

(क) मया जलं पीयते (कर्तृवाच्ये)

(ख) रामः पुस्तकं पठति (कर्मवाच्ये)

(ग) तेन विद्यालयः गम्यते (कतृवाच्ये)

प्र.14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाद्यपुस्तकस्य एकं सुभाषितं लिखत 2

प्र.15 अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीयाः (कोऽपि द्वे) 2

(क) गणेशं नमः । (ख) सः पठन्ति । (ग) वृक्षं पत्राणि पतन्ति।

प्र.16 रिक्तस्थानानि पूरयतत – (कोऽपि चत्वारि) ½x4=2

(क) एका निर्धना....वृद्धा.....स्त्री अवसत् ।

(ख) निनादय नवीनामये वाणीः ...वीणाम्....।

(ग) वसन्ते लसन्तीह ...सरसा...रसाला।

(घ) प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति...जन्तवः...............।

(ङ) आत्मनः प्रतिकूलानि.....परेषाम्.....न समाचरेत् ।

प्र.17 अधोलिखितानि वाक्यानि पाठाधारितं कथाक्रम संयोजनम् । ½x4=2

(क) सा साखिभिः सह तीर्थयात्रायै काशीविश्वनाथमन्दिरं प्रति गच्छति ।

(ख) उमा मासान्ते उत्सवार्थं दुग्धस्य आवश्यकताविषये चन्दनं सूचयति।

(ग) मल्लिका पूजार्थं मोदकानि रचयति।

(घ) चन्दनः उत्सवसमये अधिकं दुग्धं प्राप्तुं मासपर्यन्तं दोहनं न करोति।

प्र.18 अधोलिखित गद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत– 3

पुरा कस्मिंश्चिद् ग्रामे चासीत् । एकदा माता स्थाल्यां तण्डुलान् निक्षिप्य पुत्रीम् आदिशत् – ''सूर्यातपे तण्डुलान् खगेभ्यो रक्ष।''

किञ्चित् कालादनन्तरम् एको विचित्रः काकः समुड्डीय तस्याः समीपम् अगच्छत् ।

(1) ग्रामे एका का अवसत् ? (2) तस्याः दुहिता कीदृशी आसीतः ?

(3) सूर्यातपे कान् खगेभ्यो रक्ष ?

**अथवा**

तदा खिन्नो बालकः एते पक्षिणो मानुषेषु नोपगच्छन्ति । तदन्वेषयामि अपरं मानुषोचितं विनोदयितारम् इति विचिन्त्य पलायमानं कमपि श्वानम् अवलोकयत् । प्रीतो बालः तम इदं संबोधयत् – रे मानुषाणां मित्र ! किं पर्यटसि अस्मिन् निदाघदिवसे ? इदं प्रच्छायशीतलं तरूमूलम् आश्रयस्व। अहमपि क्रीड़ासहायं त्वामेवानुरूपं पश्यामीति।

(1) खिन्नो बालकः एते पक्षिणो केषु नोपगच्छन्ति ? (2) पलायमानं कं अवलोकयत् ?

(3) 'रे मानुषाणां मित्र !'' इति कः अवदत् ?

प्र.19 अधोलिखितम् पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 3

निनादय नवीनामये पाणि! वीणाम् । मृदुं गाय गीतिं ललित–नीति लीनाम् ।

मधुर–मञ्जरी–पिञ्जरी– भूत मालाः वसन्ते लसन्तीह सरसा रसालाः ।

(1) वाणि ! कां निनादय ? (2) कदा रसालाः लसन्ति ? (3) ललितनीतिलीनां किं मृदुं गाय ?

(अथवा)

वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च । अक्षीणो वित्ततः क्षीणो वृत्तस्तु हतो हतः ।।

(1) यत्नेन किं संरक्षेत् ? (2) किम् एति याति च ? (3) वित्ततः क्षीणः कथम् भवति ?

प्र.20 अधोलिखितम् नाट्यांश पठित्वा प्रश्नानाम् उत्तराणि लिखत् - 3

चन्दनः - अहा! सुगन्धस्तु मनोहरः ।(विलोक्य) अयो मोदकानि रच्यन्ते
(प्रसन्नःभूत्वा) आस्वादयामि तावत् ।(मोदकं ग्रहीतमिच्छति)

मल्लिका- (सक्रोधम्) विरम! विरम् ! मा स्पृश! एतानि मोदकानि ।

चन्दनः - किमर्थं क्रुध्यसि ! तवव हस्तनिम्रितानि मोदकानि दृष्ट्वा अहं जिहालोलुपतां नियन्त्रयितुम् अक्षमः अस्मि किं न जानासि त्वामिदम् ?

मल्लिका- सभ्यम् जानामि नाथ! परम एतानि मोदकानि पूजानिमित्तानिसन्ति।

(1) ''अहा! सुगन्धस्तु मनोहरः इति कः वदति ?

(2) मा स्पृश! एतानि कानि ?

(3) मोदकानि किमर्थं सन्ति ?

(अथवा)

चन्दनः - नमस्करोमि तात! पञ्चदश घटान् इच्छामि । किं दास्यसि ?

देवेशः - कथं न ? विक्रयणाय एव एते। गृहाण घटान् ।पञ्चशदुत्तैकशतं रूप्यकाणि च देहि।

चन्दनः - साधु ! परं मूल्यं तु दुग्धं विक्रीय एव दातुं शक्यते ।

देवेशः - क्षम्यतां पुत्र ! मूल्यं विना तु एकमपि घटं न दास्यामि ।

(1) कति घटान् इच्छामि ?

(2) कति रूप्यकाणि देहि ?

(3) मूल्यं विना तु किं न दास्यामि ?

प्र.21 अधोलिखितम् अपठित गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत् - 4

स्वतन्त्रतादिवसे प्रातःकाले एव नगरे-नगरे ग्रामे-ग्रामे राष्ट्रध्वजारोहणं क्रियते । तदनन्तरं नेतृणां भाषणानि भवन्ति। जनाः स्वगृहेषु कार्यालयेषु च राष्ट्रध्वजम् आरोहन्ति राष्ट्रस्य उन्नतये च शपथं कुर्वन्ति । राष्ट्रभक्तानां वीराणां स्मरणं क्रियते। दूरदर्शने दिल्लीनगरस्य स्वतन्त्रतादिवसस्य राष्ट्रीय कार्यक्रमः दृश्यते।

(1) स्वतन्त्रतादिवसे केषां भाषणानि भवन्ति ?

(2) दूरदर्शने कस्य कार्यक्रमः दृश्यते?

(3) के राष्ट्रस्य उन्नत्यै शपथं कुर्वन्ति ?

(4) स्वतन्त्रतादिवसे कदा राष्ट्रध्वजारोहणं क्रियते ?

प्र.22 स्वप्राचार्य कृते अवकाशार्थं प्रार्थनापत्रं संस्कृतभाषायं लिखत् । 4

अथवा

स्वमित्राय एकं शुभकामनापत्रं संस्कृतभाषायां लिखत् ।

प्र.23 अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृतभाषायं निबंधं लिखत् 4

1) संस्कृत भाषायः महत्वम्

2) पर्यावरणम्

3) अस्माकं देशः

4) महाकविः कालिदासः